श्री स्कंद षट्कं

श्री स्कंद षट्कं

षण्मुखं पार्वतीपुत्रं क्रौंचशैलविमर्दनं |
देवसेनापतिं देवं स्कंदं वंदे शिवात्मजं || 1 ||

तारकासुरहंतारं मयूरासनसंस्थितं |
शक्तिपाणिं च देवेशं स्कंदं वंदे शिवात्मजं || 2 ||

विश्वेश्वरप्रियं देवं विश्वेश्वरतनूद्भवं |
कामुकं कामदं कांतं स्कंदं वंदे शिवात्मजं || 3 ||

कुमारं मुनिशार्दूलमानसानंदगोचरं |
वल्लीकांतं जगद्योनिं स्कंदं वंदे शिवात्मजं || 4 ||

प्रळयस्थितिकर्तारं आदिकर्तारमीश्वरं |
भक्तप्रियं मदोन्मत्तं स्कंदं वंदे शिवात्मजं || 5 ||

विशाखं सर्वभूतानां स्वामिनं कृत्तिकासुतं |
सदाबलं जटाधारं स्कंदं वंदे शिवात्मजं || 6 ||

स्कंदषट्कं स्तोत्रमिदं यः पठेच्छृणुयान्नरः |
वांछितान् लभते सद्यश्चांते स्कंदपुरं व्रजेत् || 7 ||

इति श्रीस्कंदषट्कं |